IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# अर्वाचिनसंस्कृतनाट्यसाहित्ये वीरेन्द्रकुमारभट्टाचार्यस्य स्थानम्

रिक्ता मिद्या

गवेषिका, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः

**सारांशः –** संस्कृतसाहित्यं भारतीयसंस्कृतेः अमूल्यं धरोहरं वर्तते। प्राचीनकालात् आरभ्य आधुनिककालपर्यन्तं तस्य विकासः निरन्तरं जातः। आधुनिकसंस्कृतसाहित्यस्य प्रारम्भः प्रायः सप्तदशशताब्द्यां स्वीकृतः इति विद्वांसः मन्यन्ते। अस्मिन् काले सामाजिक-राजनैतिकपरिवर्तनानां प्रभावः संस्कृतसाहित्ये स्पष्टतया परिलक्षितः। नवजागरणस्य प्रभावेन संस्कृतसाहित्ये नूतनाः साहित्यविधयः यथा गीतिकाव्यं, दृश्यकाव्यं, रेडियोनाटकं, गजल्, हाइकु इत्यादयः विकसिताः। रामावतारशर्मा, क्षमारावः, श्रीधरभास्करवर्णेकरः, रतिनाथझा इत्यादयः बहवः विद्वांसः अस्मिन् काले महत्वपूर्णाः साहित्यकाराः अभवन्। भारतस्य विविधेषु प्रदेशेषु संस्कृतसाहित्यस्य समृद्धा परम्परा दृश्यते। विशेषतः वङ्गदेशे संस्कृतनाट्यरचनायाः उल्लेखनीयः विकासः अभवत्।

अर्वाचीनसंस्कृतसाहित्यपरिसरे वीरेन्द्रकुमारभट्टाचार्यः एकः प्रमुखः साहित्यकारः अस्ति। तेन सिद्धार्थचरितम्, गीतगौराङ्गम्, शरणार्थिसंवादः इत्यादीनि नाट्यकृतयः विरचिताः, येषु सामाजिकसमस्याः समकालीनजीवनस्य च यथार्थचित्रणं दृश्यते। तस्य काव्येषु नाटकेषु च नूतनदृष्टिः सामाजिकचेतना च स्पष्टतया परिलक्ष्यते। तेन संस्कृतनाट्यसाहित्यस्य समृद्धौ महत्त्वपूर्णम् अवदानं दत्तम्। अतः अर्वाचीनसंस्कृतसाहित्ये वीरेन्द्रकुमारभट्टाचार्यस्य स्थानम् अत्यन्तं गौरवपूर्णं मन्यते।

**कुटशाब्दाः –** संस्कृतसाहित्यस्य, दृश्यकाव्य, अर्वाचिन, नाट्यम्, अनेन, इति, रचितानि, भवति, काव्यानि, अत्र, यथा, अस्मिन, अस्ति

संस्कृतसाहित्यस्य प्राचीनकालः अत्यन्तं समृद्धः विशालश्चासीत। क्रमेणस्मिन् यदा वयं आधुनिककालस्य विषये विचार्यामः तर्हि सर्वप्रथमं आधुनिक-कालस्य कालनिर्धारणस्य प्रश्नः सम्मुखोपस्थितो भवति, यतः प्रत्येकः युगः स्वीये समये आधुनिकः एव भवति तस्य च पूर्वं व्यतीतो समयः प्राचीनः भवति। परन्तु इयं परिभाषा स्वीकरनं नैव समीचीनम्। अतः विभिन्नाः विद्वांसः अस्मिन् विषये स्वतन्त्र

मतम् प्रदत्ताः ते अस्मिन् सन्दर्भे विचारणीयाः सन्ति। प्रो° वर्णेकरस्य मराठी-ग्रन्थे 'अर्वाचीन संस्कृत साहित्य' इत्यनुसारेण आधुनिककालस्य प्रारम्भः 17 तमा शताब्दी अस्ति। डॉ° राधावल्लभ-त्रिपाठिनः मतमस्ति -

**"विश्व और देश में बदलती राजनैतिक, सामाजिक स्थितियों के बोध के साथ समग्र राष्ट्र के ऐकात्म के प्रति दृष्टि कम से कम एक व्यावर्तक है, जो काल और विषयवस्तु की दृष्टि से आधुनिक साहित्य का उपक्रम कराता है।"१**

पं° केशवरावमुसलगाँवकरः संस्कृतसाहित्यस्य अर्वाचीनकालः सप्तदशशती स्वीकृत्य अस्य चतुर्धा विभागं कृतवान् -

शताब्द्या: स्वीकरवेन् अस्मुं चतुर्खण्डयु विभक्तवान् —

1. प्रारम्भिकः कालः (17 तमा शती)
2. जागरणः कालः (18 तमा शती)
3. उत्तरार्द्धः कालः (19 तमा शती)
4. समृद्धि कालः (20 तमा शती)

नवजागरणेन सहैव आधुनिककाले संस्कृतरचनानां कलेवरेऽपि पर्याप्तं परिवर्तनमभवत्। समयानुसारं समाजे भव्यमाणे सामाजिकं राजनैतिकं च परिवर्तनानां पर्यास: प्रभाव: संस्कृतसाहित्ये द्रष्टुं प्राप्यतेस्म। सहैव संगीतिका, नुकृषणनाट्यं, रेडियोनाट्यं प्रभृति सदृशा: नवीनाभि: विधाभि:, तथा च कजरी, दोलागीति:, गजल, हाइकु आदीनाम् विभिन्नविधानां नवीनछन्दानां प्रयोगेणापि संस्कृतसाहित्ये एकीया: नवनीताया: संचारमभूता।

अनेन प्रकारेण आधुनिककालस्य विभाजनाध्ययनेन ज्ञायते यत् संस्कृत-वाङ्मये आधुनिकसंस्कृतसाहित्यस्य स्थानं महत्वं च अभूतपूर्वमस्ति। अस्मिन्नेव काले भारतीयसंस्कृतवाङ्मयस्य प्रचार:-प्रसारः सम्पूर्णे विश्वे भवितुं शक्तः । संस्कृतस्य संरक्षणाय अनेकानां संस्थानां स्थापना समारब्धा। अस्मिन् एव काले न केवलं प्राचीनान् ग्रन्थान् विधां च अग्रे सरिता: अपितु सततं भव्यमाणे नवप्रयोगेषु आधुनिकविधासु, समस्यासु च भव्यमाणा: सर्जना: सम्पूर्णस्य विश्वस्य ध्यानं संस्कृतं प्रति आकृष्टं चकार। अतः आधुनिकसंस्कृतसाहित्यस्य स्थानम् उपेक्षितं नैव कर्तुं शक्यते।

भारतवर्षस्य विविधेषु स्थानेषु अर्वाचीनानि संस्कृतसाहित्यानि प्रतिनियतं रचितानि भवन्ति। विषयेऽस्मिन् दिग्दर्शनन्यायेन किञ्चिदुपस्थाप्यते । विहारप्रान्ते लब्धजन्मा महामहोपाध्यायः रामावतारशर्मा अर्वाचीनसंस्कृतसाहित्यलेखकेषु एकतमः। अनेन विविधानि काव्यानि रचितानि। तेषु धीरनैषधमिति नाटकं मुद्गरदूतमिति गीतिकाव्यं भारतीयमितिवृत्तमिति काव्यं विशेषतः समुल्लेखमर्हन्ति ।

क्षमारावमहाभागायाः साहित्यसाधनया अर्वाचीनसंस्कृतसाहित्यरचनाया विविधा नवीना दिशः समुन्मीलिताः। १३५शार्दूलविक्रीडितछन्दोभि अस्याः मीरालहरीकाव्यम् अतीव हृदयावर्जकम्। तया रचितानि कृत्यन्तराणि यथा सत्याग्रहगीत्य यत्र विद्यते महात्मागान्धीमहाभागस्य जीवनदर्शनम्। संस्कृते बहवः कथाः अनेन विरचिताः।

तामिलनाडुप्रदेशीयः ड. वेंकटराघन्-रचितानि दृश्यकाव्यानिअवन्तिसुन्दरी विकटनितम्बा तथा विजयाङ्का प्राचीनभारतीयकवयित्रीणां जीवनमाधारीकृत्य रचितानि। प्राचीन पौराणिकमितिवृत्तमवलम्ब्य रचितं दृश्यकाव्यं प्रेमवृत्तमवलम्ब्य रचितम् आनार्कलीति रूपकम् । लक्ष्मीस्वयम्बरमिति। सेलिमानार्कल्योः अप्पयदीक्षितस्य प्रतिभाशालिनी वंशधरस्य श्रीत्यागराजमधीत्याध्यस्य प्रपौत्रोऽयं महालिङ्गशास्त्री। अर्वाचीनसंस्कृतसाहित्यपरिसरे अनेन बहुविधानि काव्यानि रचितानि। तेषु कतिचन यथा किङ्किनीमाला, भासकथासारः, कौण्डिन्यप्रहसनम्, द्रविड्डार्यासुभाषितसप्ततिः, व्याजोक्तिरत्नावली, भ्रमरसन्देशः, वनलता, प्रतिराजसूयम, आदिकाव्योदयम्, मणिमालास्तुतिपुष्पोपहारः, भारतीवियादः।

रामनाथपाठकः अन्यतमः अर्वाचीनसंस्कृतसाहित्यरचयिता। अनेन रचितं गीतिकाव्यद्वयम् श्रद्धाञ्जलिः राष्ट्रवाणी चेति । एतदतिरिच्य बहूनि गीतानि अनेन रचितानि ।

श्रीधरभास्करवर्णेकर नागपुरविश्वविद्यालयस्याध्यापक आसीत्। अस्य काव्यकृतयः महाभारतकथा, भारतरत्नशतकम्, स्वातन्त्र्यवीरशतकम्,मन्दोर्मिमाला (काव्यसंग्रहः),

कालिदासरहस्यम्, रामकृष्णपरमहंसीयम् वात्सल्यरसायनम् श्रमगीता। एतव्यतिरेकेण 'शिवराज्योद्यम्' नाम महाकाव्यम्, 'विवेकानन्दविजयम्' नाम दृश्यकाव्यं समाकर्षकम् ।

रतिनाथ झा काशीहिन्दुविश्वविद्यालयस्य प्राध्यापकपदम् अलंकृतवान्। अस्य साहित्यकृतयः अरविन्दशतकम्, मालवीयप्रशस्तिः, गान्धीशतकम्, महावीराभ्युदयमहाकाव्यम्।

एतद् व्यतिरेकेण भारतवर्षस्य संस्कृतसाहित्यकारेषु जगन्नाथपाठकः, राधावल्लभत्रिपाठी, परमानन्दशास्त्री, उमाशंकरशर्मात्रिपाठी, रामकरणशर्मा, अभिराजराजेन्द्रमिश्रः, केशवचन्द्रदाशः चेति अन्यतमाः ।

मानवमनीषाया विकाशशीलायां सहस्रदिग्गामिन्यां संस्कृतिधारायां महनीयस्यास्य भारतवर्षस्य प्रदेशान्तराणामिव बङ्गभुमेरपि अवदानं विशेषतस्तात्पर्यपूर्ण गौरवावहञ्च। संस्कृतसाहित्यस्य विविधासु शाखासु वङ्गीयप्रतिभाया गौरवमयी क्रियाशीलता सुदूरातीतकालादारभ्य इदानीन्तनकालं यावदम्लानैवावतिष्ठते। अतश्च वङ्गीयकवीनां लेखनीतो निर्गतानि निर्गच्छन्ति च महाकाव्य-खण्डकाव्य-गीतिकाव्य-दृश्यकाव्य-चम्पूकाव्य-कोषकाव्य-संस्तवकाव्य मुक्तककाव्यम् प्रभृतीनि विविधानि काव्यानि सामग्रिकं संस्कृतसाहित्यसम्भारं समृद्धिमन्तं कुर्वन्ति । अनुवादसाहित्ये तथा साहित्यसमीक्षाक्षेत्रेऽपि प्रगल्भायते वङ्गप्रतिभा।दृश्यकाव्यधारा तत्र एतिहासिकवृत्ताश्रयाणि रूपकाणिसाम्प्रतिके समये भारतवर्षस्य विविधेषु प्रदेशेष्विव अस्मिन् वङ्गदेशेऽपि दृश्यकाव्यरचना विचित्रमार्गावगाहिनी विलोक्यते । संस्कृत साहित्य-प्रान्तरे सुचिरं क्षीणातिक्षीणा ऐतिहासिकनाट्यरचनाधारा विंशशताब्यां कुलप्लाविनी जाता । तथाहि मौर्ययुगीयमैतिहासिकं वृत्तमवलम्ब्य विश्वेश्वरविद्याभूषणेन रचितं सप्ताङ्क चाणक्यविजयमिति नाटकम् । मिवाराधिपतेः

राणाप्रतापसिंहस्य प्रतापोज्ज्वलं चरितमाधारीकृत्य षडङ्क मिवारप्रतापमिति, यशोराधिपतेः प्रतापादित्यस्य वीरत्वपूर्ण चरित्रं समवलम्ब्य अष्टाङ्क वङ्गीयप्रतापमिति, मराठानायकस्य शिवाजीमहाभागस्य देशप्रेमप्रभिन्नं समुद्दीपकं चरित्रचित्रं समुद्दिश्य दशाङ्क शिवाजीचरिचमिति त्रीणि ऐतिहासिकानि नाट्यानि निर्मितानि हरिदाससिद्धान्तवागीशेन। पञ्चाननतर्करत्नस्य मिवाराधिपतेः प्रतापसिंहपुत्रस्य अमरसिंहस्य ऐकान्तिकदेशानुरक्तेर मरवृत्तावलम्वि अष्टाभिरकैः प्रविभक्तम् अमरमङ्गलं नाम नाटकं सुतरामेव प्रथते। यतीन्द्र-विमलचतुर्चुरीणस्य लक्ष्मीवाइनामिकाया झांसीश्वयां महिममयचरितावलम्बनं दशभिर्दश्यैः प्रविभक्तं भारतलक्ष्मीनाटकम्, नेताजीसुभाषचन्द्रस्य देशमातृकोद्धरणव्रतदीक्षितजीवनाधारकं सुभाष-सुभासम् महात्मागान्धीमहाभागस्य राजनैतिकतपस्योज्ज्वलजीवनचरिताश्रयं भारतजनकम्, स्वाधीनभारतस्य प्रथमराष्ट्रपतेः राजेन्द्रप्रसादस्य चरितभित्तिकं भारतराजेन्द्रम् चित्तरञ्जनदासस्य चरित्रचित्रकं देशबन्धुदेशप्रियमित्यादीनि नाट्यानि ऐतिहासिकं वृत्तं चरित्रञ्च विषयीकृत्य राराज्यन्ते। स्वाधीनतोत्तरभारते काश्मीरसमस्याः समाश्रित्य श्रीजीवन्यायतीर्थन रचितं सिन्धुसौवीरसंग्रामं नामैकाङ्क रूपकम् । नित्यानन्दस्मृतितीर्थविरचितेषु ऐतिहासिकनाट्येषु कतिचन यथा सुभाषविजयम्, अमरवीरवृत्तान्तम् (क्षुदिरामवसुविषयकम्) वालेश्वरमहायुद्धम् (वाघायतीनवीरत्वाश्रयम्) सुशीलविजयम् (सुशीलचन्द्रसेनगुप्तस्य वीर्यप्रदर्शकम्)। योगेन्द्रनाथचक्रवर्तिनः पृथ्वीराजचौहानस्य चरितोपजीव्यं संयुक्तापृथ्वीराजम् इति नाट्यमपि अत्र समुल्लेखार्हम् ।अस्यां शताब्द्यां भाषान्तराश्रयनाट्यर चयितृणामिव संस्कृतनाट्यप्रणेतृणामपि नाट्यकृतिषु युगसमस्या यथायथरूपेण प्रतिबिम्बिता विलोक्यन्ते। शिक्षा-शिल्प-राजनीतिप्रभृतिविविधविषयाश्रया युगसमस्यास्तेषां मानसं पीडयन्ति येन तादृशानि युगसमस्याधारकाणि नाट्यानि बहूनि शताब्द्यामस्यां विरचितान्यभवन् ।

द्वितीयविश्वयुद्धस्य बीभत्सं रूपं प्रकटीकृतं श्रीजीवन्यायतीर्थन स्वरचिते अङ्कद्वयात्मके चण्डताण्डवनामके प्रहसने। अत्र हिलार-मुसौलिनीस्तालिनप्रभृतीनि ऐतिहासिकचरित्राणि यथोपस्थापितानि तथा लोभक्रोध-हिंसाधर्मप्रभृतयो मानविकप्रवृत्तयोऽपि नाट्यपात्ररूपेणावतारिताः। क्षमतोन्मत्ता राजनैतिका नेतारो मानवानां विनाशं न परिगणयन्ति। अत्र विश्वराजनीतौ क्षमताधिकृतां विश्वनेतृणां कर्मसु मानव-मारणानुकूलहिंसात्मकसमुद्योगो, वाचि तु विश्वशान्तेर्महनीयवाणीति द्विचारिता शाणितव्यङ्गभङ्ग्या समङ्किता नाट्यकृता। १९४४-खिष्टवर्षे प्रचलति घोरतमे विश्वयुद्धे विश्वशान्तये समनुष्ठीयमानोऽभवत् यज्ञविशेषो दिल्लीनगर्य्याम् । तत्रेदं नाट्यमभिनीतमभवत्। दरिद्रदुर्दैवमिति प्रहसनं मानवमनसः स्वार्थपरतारूपां दुष्प्रवृत्ति निरावरणां करोति। नायको वक्रेश्वरः कदाचित् सिद्धदम्पत्योः आशीर्वादवशात् प्रभूततण्डुलप्रदात्री पाशां लब्धवान्। किन्तु तया पाशया यथा स्वस्य तथा प्रतिवेशिनामपि तण्डुलप्राप्तिर्भवतीति दृष्ट्वा स वक्रेश्वरः तां पाशां वह्नौ प्रक्षेप्तुमैच्छत्। वक्रेश्वरेणोक्तम् –

**“अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।**

**समानधनगर्वेण स्पर्धमानो हि दुःसहः” ।। २**

अनेन नाट्यकृता विरचिते विवाहविडम्बनाख्ये प्रहसने षष्टितमवयस्कस्यापि रतिकान्तस्य वित्तवतः प्रथमायां पत्न्यामुपरतायामेव पुनर्विवाहसमुद्योगः सोपहासभङ्ग्या समुपस्थापितः। रतिकान्तस्तथा हृदयहीनो यथा स विधवां भगिनीमपि तस्य सेवार्थं रक्षिता काचित्परिचारिकेयमिति विवाहयोटकाय कथयति। दूरीकृत्य मानविकी मूल्यवत्तां वैज्ञानिकीञ्च समुन्नतिम् एकान्ततः समाश्रयन्तं साम्प्रतिकं मानवसमाजं प्रति सुतीव्रो व्यङ्गकशाघातः क्रियमाण आलोक्यते श्रीजीवरचिते शतवार्षिकमिति प्रहसने। समकालिक समस्याप्रतिबिम्बितेषु अस्य नाट्यान्तरेषु कतिचन यथा पञ्चाङ्क भट्टसङ्कटम्, द्व्यङ्क पुरुषरमणीयम् क्षुतक्षेमीयम्, चिपिकचर्वणम्, रागविरागम्, वनभोजनम्, चौरचातुरीयम्, विधिविपर्यासम्, पुरुषपुङ्गवः। कृतिना नाट्यकृता श्रीजीवेन प्रहसनजातीयासु नाट्यकृतिषु वैलक्षण्यमानीतम् ग्राम्यतासंसृष्टश‍ृङ्गाररसस्य परिहारं कुर्वता। तस्यैतादृशीषु नाट्यकृतिषु सवैदग्ध्यहास्यस्य (wit) साधिक्षेपहास्यस्य (satire) च प्राधान्यम्। विविधश्रेणीभाजां नागरिकाणामधः पतितं चरित्रचित्रं साधिक्षेपभङ्ग्या समुपस्थापितं नाट्यकृता श्रीजीवेन। एवम्बिधायां नाट्यरचनायां सुखमयमुखोपाध्यायस्य कविसहृदयसम्बादः संस्कृतोद्धरणम्, नित्यानन्दस्मृतितीर्थस्य मातृवन्दनम् जननीश्राद्धवासरमित्यादीन्यपि समुल्लेखार्हाणि।

साम्प्रतिकसमस्या-समाश्रयेण रूपकाणां रचयितृषु वीरेन्द्रकुमारभट्टाचार्योऽपि सुतरामेव कृतित्वभाक्। तेन प्रणीते वेष्टनव्यायोगे न्याय्येन न्याय्येतरेण वा पथा अभिलषितस्य अधिकारस्य अधिगमाय कर्मचारिभिः आधिकारिकस्य आधिकारिकाणां वा बलाद् वेष्टनावरोधस्य चित्रमुपस्थापितमवलोक्यते। वेष्टनमित्यस्य ‘घेराओ’ इति भाषा। तस्यैव कृत्यन्तरे शार्दूलशकटाभिधाने पञ्चभिरङ्कैः प्रविभक्ते राष्ट्रीयपरिवहनसंस्थायाः कर्मचारिणां श्रमिकाणाञ्च प्रात्यहिकं जीवनचित्रमङ्कितमालोक्यते। अत्रैकतो यथास्त्युपस्थापितः श्रमिकाणां धर्मघटकर्मविरतिप्रभृतिप्रसङ्गः तथा तैः सह आलोचनादिव्यापारे कर्तृपक्षस्यान्तरिकः समुद्योगः। अन्तिमे एवमस्ति समभिव्यञ्जितं यत् परस्परविश्वास एव संस्थायाः श्रेष्ठं वित्तम्। नक्सालविद्रोहमवलम्ब्य भट्टाचार्येणानेन विरचितः लक्षणव्यायोगः। वङ्गविभागात् परं पूर्ववङ्गतः समागतानां शरणार्थिनां समस्यामधिकृत्य विलिखितमनेन शरणार्थिसंवाद इति।

वाल्मीकि कालिदासादीनां जीवनालेख्यमवलम्ब्य कालीपदतर्काचार्य-वीरेन्द्रकुमार भट्टाचार्यादिभिः कतिचन रूपकाणि रचितानि। नाट्यकृतां कल्पनाप्रभवानि विचित्ररूपाणि वृत्तानि अवलम्ब्यापि समुद्भूतानि कतिचन नाट्यानि परिप्राप्यन्ते।

युगावतार-सिद्धसाधक-महापुरुषादिविशिष्टव्यक्तित्वभाजां चरितमवलम्ब्यापि बहूनि नाट्यानि समयेऽस्मिन् विरचितान्यभवन्। तेषु कतिचन समुल्लिख्यन्ते । वीरेन्द्रकुमार भट्टाचार्यकृतं गौतम बुद्धजीवनचरिताधारकमष्टाङ्क नाटकं सिद्धार्थचरितम्, गौराङ्ग-जीवनोपजीव्यं गीतिनाट्यं गीतगौराङ्गमिति । गीतगौराङ्ग शूर्पणखाभिसारम् एवमादिकं गीतिनाट्यं वङ्गभूमेः संस्कृतनाट्यसाहित्यक्षेत्रे परम्परा-वैलक्षण्येन नवीनं संयोजनम्। एवमस्मिन् वङ्गप्रान्ते नाट्यरचनाधारा क्वचित् क्वचित् प्राचीनस्रोतसि प्रवहन्त्यपि बहुत्र समयसमुचितानि विलक्षणानि स्रोतांसि प्रवर्तयन्ती

समकालिकानां सहृदयानां हृदयतटानि प्लावयन्ती वङ्गीयमनीषाया निरवद्यमवदानं विश्वविदग्धजनान् स्मारयन्ती देदीप्यते।

वीरेन्द्रकुमार भट्टाचार्यस्य संस्कृतकवितासंकलनात्मको कलापिका नामको ग्रन्थो विशेषतः समुल्लेखार्हः। साहित्यएकाडेमीतः प्रकाशिते षोडशीनामके आधुनिकसंस्कृतकवितासंकलनात्मके ग्रन्थे भट्टाचार्यस्य तनुतीर्थम्, आविर्भावः, हृतसर्वस्वः, युगकविः, मेघदूतम्, वर्षाललन्तिका इति षट् कविताः संकलिता वर्तन्ते। भावविभूत्या भाषासम्पदा च भट्टाचार्यस्य कविताः सर्वथा निरवद्याः सहृदयहृदयतर्पकाश्च। कवेरस्य कृतित्वविषये प्राच्यतत्त्ववेदिना राधावल्लभत्रिपाठिनोक्तम्-संस्कृत-साहित्यपरिसरे सनेटजातीयकविता-निर्माणे अयमेव प्रथमतया सम्भाव्यते।

अतः अर्वाचिनसंस्कृतनाट्यसाहित्ये वीरेन्द्रकुमारभट्टाचार्यस्य उल्लेखयोग्यस्थानम् अस्ति।

**तथ्यसूची –**

१. 'संस्कृत साहित्य का इतिहास'- राधावल्लभः त्रिपाठी, पृ. ३

२. महासुभाषितसंग्रह – अज्ञातकविः

**ग्रन्थसूची –**

१. वर्णेकरः, श्रीधरभास्करः,'अर्वाचीन संस्कृत साहित्य', नागपुरः, 1968

२. त्रिपाठी, राधावल्लभः, 'संस्कृत साहित्य का अभिनव इतिहास', वाराणसीः, 2010

३. उपाध्यायः, बलदेवः,'संस्कृत साहित्य का इतिहास',वाराणसीः, 2007

४. मिश्रः, अभिराजराजेन्द्रः,'अर्वाचीन संस्कृत साहित्य',दिल्लीः, 2005

५. देवधरः, सीतारामः,'History of Sanskrit Literature',पुणे, 1966